# Trirangashtakam Octad on Tricolour

# ત્રિરઙ્ગાષ્ટકમ્

## Document Information

Text title : trirangAShTakam Octad on Tricolour Rashtradhvaja

File name : trirangAShTakam.itx

Category : misc, aShTaka, vrajakishora

Location : doc_z_misc_general

Author : Vrajakishora Tripathi

Transliterated by : Vrajakishora Tripathi

Proofread by : Vrajakishora Tripathi

Latest update : August 22, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Trirangashtakam Octad on Tricolour

# ત્રિરઙ્ગાષ્ટકમ્

શીર્ષાંશે રમણીયકુઙ્કુમનિભો વર્ણો સુશૌર્યાત્મકો
મધ્યાંશે ધવલઃ પ્રશાન્તચરિતો યસ્યાઃ પરિભ્રાજતે ।
નિમ્નાંશે હરિતં સમૃદ્ધિભરિતં ચિહ્નં મનોરઞ્જકં
વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૧॥

યસ્યાં રાજતિ સુન્દરં બહુગુણં ચક્રં સ્વરાપૂરિતં
ધૌર્વર્ણાકલિતં મહાયુધસમં નિત્યં રિપુત્રાસદમ્ ।
હિન્દુસ્થાનવિકાસવર્ધનકરં રાષ્ટ્રસ્ય શૌર્યાસ્પદં
વન્દે ભારતભાગ્યવર્ધનરતાં નસ્તાં ત્રિરઙ્ગાં સદા ॥ ૨॥

મુક્તાકાશતલે યદા ચલતિ સા વૈ ભારતીયા મુદા
સઙ્ગીતેન તદીયભવ્યલલિતં કુર્વન્તિ સુસ્વાગતમ્ ।
તદ્ભાવં સુખદં વિકાસભરિતં જાનાતિ રાષ્ટ્રપ્રિયો
વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૩॥

યા સ્તમ્બાદ્ ગગને પ્રખેલતિ મુહૂ રાષ્ટ્રોન્નતિસ્થાપિની
યસ્યા રૂપગુણાદિકો વિજયતે ચિત્તં નરાણાં ક્ષણાત્ ।
યાં દૃષ્ટ્વા પરદેશશાસકગણઃ શઙ્કાકુલઃ સર્વદા
વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૪॥

યા ભૂમૌ પરિરાજતે જનપદે કાર્યાલયે વેશ્મનિ
સંસ્થાને જનમાનસે પ્રતિકરે યાનેઘ ભવ્યોત્સવે ।
તોયે પોતગણે પુનશ્ચ નભસિ વ્યોમાયને ભાસતે
વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૫॥

રાષ્ટ્રં રાષ્ટ્રપતિશ્ચ રાષ્ટ્રજનતા રાષ્ટ્રસ્ય મન્ત્રી વરો
રાષ્ટ્રામાત્યગણઃ પ્રધાનસચિવો રાષ્ટ્રીયમન્ત્રાલયઃ ।
નેતારો હિ દલસ્ય શાસકગણો ગાયન્તિ નત્વાપિ યાં
વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૬॥

રાજ્યાણાં પ્રમુખાધિકારિનિકરસ્તન્મુખ્યમન્ત્રાદયઃ
    સૈન્યાશ્છાત્રગણશ્ચ શિક્ષકતતિર્ન્યાયાલયાસ્યાધિપાઃ ।
દેશપ્રેમિજના નમન્તિ નિતરાં ગીત્વા યદીયં યશો
    વન્દે ભારતભાગ્યવર્ધનરતાં તાં નસ્ત્રિરઙ્ગાં સદા ॥ ૭॥

વન્દે ભારતમાતરં બહુતરં તત્સંવિધાનં મુદા
    સ્વાધીનાઙ્કિતરાષ્ટ્રિયં જનગણં રમ્યં ત્રિરઙ્ગધ્વજમ્ ।
ધર્માણાં નિરપેક્ષતાં નતશિરાસ્ તત્સાર્વભૌમં પ્રતિ
    વન્દે લોકમતં પ્રદેશનિકરં તદ્-રાષ્ટ્રગીતં સદા ॥ ૮॥

ઇતિ શ્રીવ્રજકિશોરવિરચિતં ત્રિરઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Composed, encoded and proofread by Vrajakishora Tripathi.

---

*Trirangashtakam Octad on Tricolour*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*